कुर्य्यात्त पञ्चदशीं पीड़ां मनुजाधिपस्यैव ॥
नागरकाणामभ्यन्तरस्थिता यायिनाञ्च बाह्यस्था।
परिवेषमध्यरेखा विज्ञेया क्रन्दसाराणाम् ॥
रक्तः श्यामो रूक्षश्च भवति येषां पराजयस्तेषाम् ।
स्निग्धः श्वेतो द्युतिमान् येषां भागो जयस्तेषाम् ॥")

परिवेषणम् । इति हेमचन्द्रः ॥

परिवेषकः, पुं, (परिवेषतीति । परि + विष + ण्वुल् ।) परिवेष्टा । परिवेषणकर्त्ता । तस्य लक्षणं यथा,—
"स्नातश्चन्दनचर्च्चितः सुवसनः स्रग्वी प्रसन्नाननः
स्वच्छात्मा सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः।
स्वामिस्नेहपरःस्वकार्य्यनिपुणःप्रौढ़ो वदान्यःशुचि-
र्विप्रो वा परिवेषकस्तु कुलजश्चान्योऽपि वा भूपतेः ॥"
इति पाकराजेश्वरः ॥

परिवेषणं,क्ली,(परि + विष् + णिच् + ल्युट् ।) वेष्टनम् । भोजनार्थं भोजनपात्रे अन्नादेर्दानम् । अथ श्राद्धे परिवेषणं मनुः ।
"पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम् ।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥
अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं पूरितं पात्रमिति शेषः । उपनिक्षिपेत् परिवेषणार्थम् । तथा च पाकस्थाल्या आकृष्य प्रथमं भोजनपात्रे न देयं किन्तु स्थाल्यादिकं पाणिभ्यां पात्रसमीपे भूमौ संस्थाप्य पश्चात् पाणिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषयेत् । उभाभ्यामपि हस्ताभ्यामाहृत्य परिवेषयेदिति मत्स्यपुराणात् । यत्तु श्राद्धे परिवेषणन्तु दक्षिणपाणिमात्रेणैवाज्ञानभिधानादिति मैथिलोक्तं तन्न । एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेदित्यादि पुराणीयेन एकपाणिदत्तशूद्रादत्तभक्षणनिषेधेन तन्मात्रपरिवेषणस्यापि निषिद्धत्वात् पाणिभ्यामपि पात्रान्तरितं कृत्वा देयम् ।
हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च ।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते च किल्बिषम् ॥
तस्मादन्तरितं देयं पर्णेनाथ तृणेन वा ।
प्रदद्यान्न तु हस्तेन नायसेन कदाचन ॥
इति वशिष्ठवचनेन सामान्यतोऽभिधानात् । पितृभक्तितरङ्गिण्यामप्येवम् । मनुः ।
गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु ।
विन्यसेत्प्रयतः सम्यग्भूमावेव समाहितः ॥
आमिषं पानपात्रञ्च भोक्तुर्दक्षिणतो न्यसेत् ।
भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ॥
हृद्यानि चैव मांसानि पानानि सुरभीणि च ।
उपनीय च तत् सर्व्वं शनकैः सुसमाहितः ॥
परिवेषयेत् प्रयतो गुणान् सर्व्वान् प्रचोदयन् ।
गुणान् उपकरणानि भूमावेव न तु व्यञ्जनादिपात्राणि अन्नादि पात्रोपरि निक्षिपेत् ।" इति श्राद्धतत्त्वम् ॥

परिवेषिका, स्त्री, (परिवेषति या । परि + विष् + ण्वुल् । स्त्रियां टाप् अत इत्वञ्च ।) परिवेषणकर्त्री । तस्या लक्षणं यथा,—
"स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभमुखी नयनाभिरामा ।
बिम्बाधरा शिरसि बद्धसुगन्धिपुष्पा
मन्दस्मिता चितिभर्त्तां परिवेषिका स्यात् ॥"
इति पाकराजेश्वरः ॥

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टितम् । तत्पर्य्यायः । परिक्षिप्तम् २ वलयितम् ३ निवृतम् ४ परिष्कृतम् ५ परीतम् ६ । इति हेमचन्द्रः ॥

परिव्याधः, पुं, (परि सर्व्वतोभावेन विध्यतीति । परि + व्यधौ ताड़े + "श्याद्व्यधेति ।" ३ । १ । १४१ । इति णः ।) अम्बुवेतसः । द्रुमोत्पलः । इत्यमरः । २ । ४ । ३०,६० ॥

परिव्रज्या, स्त्री, (परि + व्रज + भावे क्यप् । स्त्रियां टाप् ।) तपस्या । इति हेमचन्द्रः । १ । ८१ । (इतस्ततो भ्रमणम् । यथा, मनुः । १० । ५२ ।
"वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥"
"लौहवलयादि चालङ्करणं सर्व्वदा च भ्रमणशीलत्वम् ॥" इति कुल्लूकभट्टः ॥)

परिव्राजः, पुं, (परित्यज्य सर्व्वान् विषयभोगान् गृहाश्रमाद् व्रजतीति । परि + व्रज + संज्ञायां कर्त्तरि घञ् ।) परिव्राट् । इत्यमरटीकायां रमानाथः ॥

परिव्राजकः, पुं, (परिव्राज + स्वार्थे कन् । परिव्रजतीति । परि + व्रज् + ण्वुल् वा ।) परिव्राट् ॥ (यथा, गोः रामायणे । ३ । ५५ । २ ।
"स परिव्राजकच्छद्मा महाकायशिरोधरः ।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः ॥")

परिव्राजिः, स्त्री, (परि + व्रज् + णिच् + इन् ।) श्रावणी । इति राजनिर्घण्टः ॥ गुलकुड़ी इति भाषा ॥ (श्रावणीमण्डूकपर्णीशब्दयोरस्या विशेषो ज्ञेयः ॥)

परिव्राट्, [ज्] परिव्राड़, पुं, (परित्यज्य सर्व्वं विषयभोगं गृहस्थाश्रमाद् व्रजति गच्छतीति । परि + व्रज + क्विप् दीर्घश्च ।) चतुर्थाश्रमी । तत्पर्य्यायः । भिक्षुः २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ । इत्यमरः । २।७।४२ ॥ सन्न्यासी ६ श्रमणः ७ । इति जटाधरः ॥ परिव्राजकः ८ पराशरी ९ व्रजकः १० । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा, गरुड़पुराणे ।
"सर्व्वारम्भपरित्यागो भैक्ष्याशं वृक्षमूलता ।
निष्परिग्रहताद्रोहसमता सर्व्वजन्तुषु ॥
प्रियाप्रियपरिष्वङ्गे सुखदुःखाविकारिता ।
सबाह्याभ्यन्तरं शौचं सुखदुःखाविकारिता ॥
सर्व्वेन्द्रियसमाहारो धारणा ध्याननित्यता ।
भावसंशुद्धिरित्येष परिव्राडवर्य्य उच्यते ॥"

परिशङ्कनीयः, त्रि, (परिशङ्क्यते इति । परि + शङ्क + अनीयर् ।) सर्व्वतोभावेन शङ्काविषयः ।यथा,
"शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीय-
माराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥"
इत्युद्भटः ॥

परिशिष्टं, क्ली, (परितः शिष्टः । शिष + क्तः ।) परिशेषविशिष्टम् । अवशिष्टार्थबोधकग्रन्थः । इति हेमचन्द्रः । २ । १७१ ॥ (यथा, छान्दोगपरिशिष्टम् । गृह्यपरिशिष्टमित्यादि ॥)

परिशुष्कं, क्ली, (परितः शुष्कम् । शुष + क्तः ।) मांसव्यञ्जनभेदः । यथा,—
"मांसं बहुघृतेर्भृष्टं सिक्तञ्चैवाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥"
इति शब्दचन्द्रिका ॥
सर्व्वतोनीरसे त्रि ॥ (यथा, हैः रामायणे । २ । ५६ । ५ ।
"उपतप्तोदका नद्यः पल्वलानि सरांसि च ।
परिशुष्कपलाशानि वनान्युपवनानि च ॥")

परिशोधः, पुं, (परि + शुध + भावे घञ् ।) परिशोधनम् । सर्व्वतोभावेन शुद्धिः ॥

परिशोषः, पुं, (परि + शुष + भावे घञ् ।) सर्व्वतोभावेन शुष्कता । (यथा, गोः रामायणे । ४ । १५ । ३४ ।
"वायुर्कपरिपीताम्बुर्विपरिम्लानपङ्कजः ।
तड़ाग इव कालेन परिशोषं गमिष्यति ॥")

परिश्रमः, पुं, (परि + श्रम + घञ् । न वृद्धिः ।) परिश्रान्तिः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ प्रयासः ५ आयासः ६ व्यायामः ७ । इति हेमचन्द्रः । २ । २३३ ॥ (यथा, रघुः । १ । ५८ ।
"तमातिथ्यक्रियाशान्त-रथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥")

परिश्रयः, पुं, (परिश्रयत्यस्मिन् इति । परि + श्रि + "एरच् ।" ३ । ३ । ५६ । इति अच् ।) सभा । (भावे अच् ।) आश्रयः । इति मेदिनी । ये । १२२ ॥

परिश्रान्तः, त्रि, (परि + श्रम + कर्त्तरि क्तः ।) सर्व्वतोभावेन श्रान्तियुक्तः । (यथा, महाभारते । १ । ४८ । २६ ।
"परिश्रान्तो वयःस्थश्च षष्टिवर्षो जरान्वितः ।
क्षुधितः स महारण्ये ददर्श मुनिसत्तमम् ॥"
स्त्री । गायत्रीस्वरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ९३ ।
"पावनी पादसहिता पेशला पवनाशिनी ।
प्रजापतिः परिश्रान्ता पर्व्वतस्तनमण्डला ॥")

परिश्रुतः, त्रि, (परि + श्रु + क्तः ।) सर्व्वतोभावेन श्रवणविशिष्टः ॥

परिश्लेषः, पुं, (परि + श्लिष + भावे घञ् ।) आश्लेषः ॥

परिषत्, [द्] स्त्री, (परितः सीदन्त्यस्याम् । परि + सद् + अधिकरणे क्विप् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) सभा । इत्यमरः । २ । ७ । १५ ॥ (यथा, गोः रामायणे ।२ । १३ । १६ ।